**प्रश्नः** – चिपिटकचर्वणमाश्रित्य कपालिनश्चरित्रं संस्कृतभाषया देवनागरलिप्या च वर्ण्यताम्।

**उत्तरम्** – प्रकृते प्रहसने चपलस्य कृपणस्य कपालिनः उपहासास्पदं चरित्रं सुललितया गीर्वाणवाण्या चित्रितं वर्तते। अस्य चरितचित्रणं सूत्रधारमुखेन नाट्यकृता प्रस्तावनायां कृतम् –

"विद्यालवेन रहितोऽपि भवेः समृद्धः।

श्रेष्ठी यथैष चपलः कृपणः कपाली॥"इति।

अयं कपाली एव अस्मिन् प्रहसने नायकः। अस्य कृपणता नाट्यकृता प्रहसनस्य प्रतिच्छत्रं निरूपिता। आरम्भे एव दृश्यते खञ्जः भृत्यः पङ्गुरामः कपालिनः जीर्णं पादुकायुगलं कुब्जा दासी मन्थरा च तस्य जीर्णं प्राचीनं छत्रं मार्गे निक्षिप्तम्। तद् जीर्णं व्यवहारस्य अयोग्यं छत्रं कपाली पुत्र-पौत्रसुखभोग्यम् इति वर्णयति। पुनश्च यदा शुनकदंशनेन तस्य पादात् रुधिरं स्रवति स्म तदा अयं वैद्यस्य दर्शनीं कः दास्यति इति विचारयन् वैद्यस्य आगमनं निराकर्तुं प्रवृत्तः। नूतनस्य कटस्य आस्तरणेन कटः जीर्यति इति चिन्ता स्वशरीरात् वहतः रक्तस्य अपेक्षया तस्य कृते समधिकपीडाकारी आसीत्। मुखे जीर्णां पादुकाम् आदाय धावन्तं कुक्कुरम् अनुधाव्य तं कुक्कुरं प्रहृत्य कपाली पादुकाम् उद्धृत्य आनयत्। शुनकदष्टः अपि सः जीर्नच्छत्रं शीर्णपादुकायुगलं च नष्टम् इति कारणेन अदुःख्यत् न पुनः शुनकदंशनजनितपीडया।

पल्लीवासिनः कपालिनः कृपणतां तथा तस्य भार्यायाः रङ्गिण्याः दुरवस्थां च जानन्ति स्म। तस्मात् पल्लीवासी तान्त्रिकं प्रतिवेशिनः अन्वरुन्धन् यथा स तान्त्रिकः कपालिनः धनम् आहृत्य रङ्गिण्यै प्रयच्छेत्। तान्त्रिकः अपि तस्य कार्पण्यस्य मात्रां ज्ञात्वा तं जाले पातयितुं मासत्रयव्याप्तं चिपिटकचर्वणं प्रस्तुतवान्। तेन स तान्त्रिकम् आदर्तुम् आरभत।

स न केवलं कृपणः अपि च स लोभी। स त्रिगुणिते सुवर्णे लुब्धः सुवर्णं दातुं सिद्धः अभवत्।

अयम् अतीव कोपनः अपि। यदा रङ्गिनी तस्य प्रभूतसम्पदः कथां घोषयति तदा स तस्याः कण्ठरोधं करिष्यामि इति कथयन् रङ्गिनीं प्रति अधावत्। एतेन तस्य भयशीलता अपि ज्ञायते। खञ्जं पङ्गुरामं कुब्जां मन्थराम् अपि स ताडयितुं प्रवृत्तः आसीत्। जीर्णच्छत्रेण शुनकं तथा प्रहृतवान् स यत् छत्रम् अपि भग्नम्। वैद्येन सह वार्तायाम् तस्य क्रोधः प्रकटितः।

सः अतीव सन्देहप्रवणः आसीत्। जीर्णच्छत्रस्य क्षेपणे दासीं रङ्गिणी एव प्ररोचयति इति स सन्दिग्धः अभवत्। वैद्यः विषविकारनाशाय यदा क्षतस्य दाहरूपं निदानम् अवदत् तस्मिन् समये अपि स वैद्यस्य दुरभिसन्धिम् अन्विष्टवान्। चिकित्सायै आगतं तान्त्रिकम् अपि स आरम्भे एव प्रवञ्चकं मतवान्।

अयं कटुवचनः। सर्वान् अपि अयं कटुभिः एव वचनैः सम्बोधयति। दासीं प्रति काकविष्ठा, गर्भदासी इत्यादशब्दानां प्रयोगः स्वभार्यायै च चूताष्ठिलम्बचिबुके इत्यादीनां शब्दानां प्रयोगः तस्य असभ्यतां द्योतयति।

परपीडकश्चायं कपाली। परपीडने अस्य दाक्ष्यं रङ्गिण्या निगदितम् - "चतुर्मुखोऽसि कलहे ताडने च चतुर्भुजः" इति। पत्न्याः कण्ठं रोद्धुम् अयं प्रवृत्तः। भृत्यौ अपि अस्य ताडनेन भीतौ। तस्य ताडनभयाद् एव पल्लीजनानां द्वारे द्वारे बम्भ्रम्यते स्म पङ्गुरामः। एतैः कपालिनः परपीडकत्वं स्पष्टं प्रतिभाति।

कपाली चपलः। चपलत्वं चास्य प्रतिच्छत्रं दरीदृश्यते। दासाभ्यां छिन्नपादुकायुगले छिन्नच्छत्रे च पथि निक्षिप्ते कपाली उद्बन्धनेन मरिष्यामि इति भाययन् रङ्गिनीं रज्जुम् आयाचत सः। रङ्गिण्या रज्ज्वां दीयमानायां च तं सः अभर्त्सयत्।

सः वञ्चकः अपि आसीत्। वैद्यं दक्षिणादानं विना एव गृहात् निष्कासयितुं स निपुणं नटितवान्। एतेन तस्य नटनपटुता अप ज्ञायते। स वचने अपि चतुरः तान्त्रिकेण सह तस्य वार्तालापे तस्य वाक्चातुर्यम् अपि प्रकटितं भवति।

मोहः अपि कपालिनः चरित्रे स्पष्टरूपेण परिलक्ष्यते। “प्राणेषु नादरो यस्य मोहच्छिन्नपरिच्छदे” इति तान्त्रिकवचनं “मम पुत्रपौत्रसुकभोग्यं छत्रमिदं पथि निक्षिपसि निर्दयम्” इत्यादिवचनानि अस्य मोहपरकत्वे प्रमाणरूपेण उपस्थापयितुं शक्यते।

एतेषु गुणदोषेषु कपालिनः अपरः कश्चन महान् गुणः आत्मसम्मानबोधः। वस्तुतः अन्येषां पुरतः अपरः कोऽपि तस्य अपमानं कुर्यात् इति स कथमपि न सहते। अतः प्रतिवेशिनः सकाशात् पादुकाम् आनीतवति पङ्गुरामे कुपितः सः अकथयत् “गृहमध्ये यथैवाहं करवाणि नाम, बहिर्मम कलङ्कम् उद्घोषयसि” इति। एवमेव नूतनकटास्तरणाय रङ्गिण्यां कुपितः सः वैद्यस्य आगमनवार्तां श्रुत्वा नूतनकटस्य आस्तरणे न पुनः असहमतिं प्रादर्शयत्।

एवं समासेन वक्तुं शक्यते यत्, कृपणः, कोपनः, कटुवाक्प्रयोक्ता, लोभी, मुग्धः, परपीडकः, वञ्चनाशीलः, वाक्पटुः, नटनशीलः च कपाली नाट्यकृता चित्रितः। अस्य चरितं नाट्यशास्त्रोक्तान् नायकगुणान् न अनुकरोति। अपि च प्रतिनायकगुणाः एव अत्र वर्तन्ते। तथा चोक्तं दशरूपके - “लुब्धो धीरोद्धतः स्तब्धः पापकृद् व्यसनी रिपुः” इति। वस्तुतः कविकल्पितं निन्दितानां चरितम् आश्रित्य प्रहसनं रचनीयम् इति निर्देशम् अनुसृत्य प्रहसननायके ईदृशाः प्रतिनायकगुणाः निन्द्याः एव वर्तेरन् इति सिद्धम् एव। अतः एतादृशानां दोषाणाम् आकरभूतं कपालिनं चित्रितवान् अस्ति कविः। एवं च तस्य तान् दोषान् एव आश्रित्य सम्पूर्णं प्रहसनं प्रवर्तते इति महत् कौशलं नाट्यकारस्य इति शम्॥